कदम्बान्ते[४२९] भवेद् बिल्वं[४३०] बिल्वान्ते[४३१] चित्तचिञ्चिणी[४३२] ॥ ९१ ॥

चिञ्चिणी परमा शक्तिर्भगस्था तु[४३३] भगात्मनि[४३४] ।
अन्तःस्थं[४३५] महिमानन्दं[४३६] महिमाज्ञा[४३७] कुलक्रमे[४३८] ॥ ९२ ॥

महिमा[४३९] च[४४०] परा शक्तिः[४४१] महिमा च[४४२] अनामिका ।
मनना[४४३] च मनाद्या[४४४] च अनन्ता सा अनामिका[४४५] ॥ ९३ ॥
अनामान्तर्गता[४४६] ज्येष्ठा[४४७] सा च[४४८] भिन्नकलोदिता[४४९] ।

स्वपक्षज्ञानकर्तारः[४५०] पक्षापक्षविभेदकः[४५१] ॥ ९४ ॥
अभेद्यभेदकानन्दः[४५२] शिवो हंसप्रकाशकः[४५३] ।

ज्ञात्वा पञ्चप्रकारोघं[४५४] संकेतं सिंहकं[४५५] स्मृतम् ॥ ९५ ॥
सिंहकं[४५६] विपरीतस्थं ऐंकारं[४५७] करणादपि ।???
विलोमादुद्भवेच्छ्रेयं[४५८] निस्तरङ्गं[४५९] तदा[४६०] पदम् ॥ ९६ ॥

पदक्रमं[४६१] पदोच्चारं[४६२] विचारं समनावरम्[४६३] ।
अमृतीशकलातत्त्वं[४६४] सिंहत्वं[४६५] च महाधिपः[४६६] ॥ ९७ ॥
सर्वान्तपदमुद्धृत्वा[४६७] विशेत् तत् परमं पदम्[४६८] ।
पदपिण्डाक्षरौघे[४६९] तु पदपिण्डाक्षराक्षराः[४७०] ॥ ९८ ॥

क्षराक्षरनिरोधेन[४७१] सञ्चिन्त्यात्मपरिग्रहम्[४७२] ।
तिष्ठाम्यहं[४७३] तदा काये निरानन्दे निरौपमे[४७४] ॥ ९९ ॥

The Silent One (the Transmental) resides in the centre of power,[85] while the Kadamba (Tree) is in the centre of the Silent One. The Bilva (Tree) is within the Kadamba (Tree), while the Tamarind (Tree) (*ciñciṇī*) of the mind-stuff (*citta*) is within the Bilva.[86] (91)

Ciñcinī is the supreme power. She resides in the Yoni (*bhagasthā*) within (the reality that is) the Yoni (*bhagātman*). It is the inner bliss of Greatness (*mahimā*) which is the Command of Greatness (*mahimājñā*) in the Kulakrama.[87] (92)

Greatness is the supreme (power) and Greatness is (the goddess) Nameless (*anāmikā*). That (goddess) Nameless (is the power of) reflection (*mananā*); the first (principle) of the mind (*manādyā*), she is endless. Jyeṣṭhā is within the Nameless and has arisen from the differentiated energy (*kalā*) (of the vital breath). (93-94ab)

In (his) own polarity (*pakṣa*) (beyond the opposites) (Śiva) is the agent of knowledge who separates the two polarities (*pakṣāpakṣa*) (of the opposites). He is the bliss of the one who divides the indivisible. (He is) Śiva who illumines the Gander. (94-95ab)

Once known, the fivefold current is said to be the Convention of the Lion. The letter of the lion is AIṀ which is reversed with respect to the instrument (of mantra). Then, because it is in the reverse order (*viloma*), the most excellent, waveless plane (of being arises).[88] (95cd-96)

1) The sequence of the parts (of the Krama), 2) the utterance of the parts (of the Krama), 3) reflection (*vicāra*) and 4) the Equal One (*samanā*), which is the best, 5) the principle of energy (*kalā*) of the Moon (*amṛtīśa*), 6) the state of the Lion, and 7) the Great King (Bhairava) - once one has laid hold of the plane at the end of all (of them), one should enter the supreme plane. (These are) the words, seed-syllables (*piṇḍa*) and imperishable letters (of mantra) in the current of the (perishable) words, seed-syllables and letters.[89] (97-98)

Then, having contemplated the (sixfold) form of the Self (*ātmaparigraha*), by blocking the Perishable (*kṣara*) and the Imperishable (*akṣara*), I abide in the incomparable body, which is the Bliss of Stillness (*nirānanda*). (99)

तदा[४७५] कुर्यात्[४७६] त्रिधानन्दं[४७७] त्र्यक्षरा त्रिपथा गतिः[४७८] ।
त्रिविधागतिसंरूद्धा[४७९] आकाशे गतिरागतिः[४८०] ॥ १०० ॥

गतिमागतिं[४८१] सञ्चिन्त्य[४८२] बिम्बोपकरणात्मकम्[४८३] ।
नित्यानन्दं परानन्दं आनन्दं भैरवात्मकम् ॥ १०१ ॥

त्र्यक्षरं त्रिपथातीतं[४८४] त्र्यक्षरं च त्रिधागतम् ।
क्षरं[४८५] सर्वमशेषस्य[४८६] शृङ्गाटाक्षरमेलकम् ॥ १०२ ॥
कैलासे[४८७] मेरुशृङ्गस्य मेरुशृङ्गाटभैरवः[४८८] ।

मन्थानभैरवे[४८९] यज्ञे[४९०] अन्वये सप्तकोटिकम्[४९१] ॥ १०३ ॥
अदिव्ये[४९२] मानुषे[४९३] लोके सिद्ध[४९४] भूम्युपदेशकम्[४९५] ।

इत्याद्यावतारे महामन्थानभैरवयज्ञे[४९६] अन्वये सप्तकोटिप्रमाणे मेरुमार्गविनिर्गते
लक्षपादाधिके आद्यपीठावतारिते[४९७] विद्यापीठमार्गे[४९८] विमलभेदोत्तरषट्क-
निर्णये[४९९] कादिभेदे आज्ञापारमेश्वरे स्वामिनीमते श्रीचतुर्विंशत्सहस्र-
संहितायां अम्बाक्रमभाषिते सिद्धदेव्याभूमिकाधिकारवर्णने[५००]
क्रमोदयो नामानन्दः ॥ ६१ ॥

Then the three-lettered (mantra), which is the triple path on the way (of the breath), generates the threefold bliss. (Thus), when the triple motion (of the breath) has been checked, (one experiences) the coming and going (of energy) in the Sky (of consciousness).[90] (100)

Having contemplated (this) coming and going, (one realises) eternal and supreme bliss which is Bhairava (Himself) who serves the (ultimate) form (*bimba*) (of the deity). (101)

The three-lettered (Vidyā) transcends the triple path, even as it moves threefold (through the triple path). The Perishable (*kṣara*) is all of everything; it conjoins the letters of the Triangle (*śṛṅgāṭa*).[91] (Thus) the Bhairava of the Triangle of Meru is on the (Point which is) Kailāsa of the peak of (the centre of) Meru. (102-103ab)

(In this way) the (scripture of) seventy million (verses)[92] that belongs to the tradition (*anvaya*) of the sacrifice of the Churning Bhairava and is the teaching concerning the planes (of realisation) has been attained (*siddha*) in the profane world of men. (103cd-104ab)

This is the (sixty-first) chapter which is the emergence of the transmission (*kramodaya*) with regards to the description concerning *the Planes of the Siddhas and the Goddesses*. It belongs to the primordial descent into the great sacrifice of the Churning Bhairava in the tradition (*anvaya*) that consists of seventy million (verses) that has emerged on the Path of Meru and (extends) for more than a hundred thousand quarter (verses). It has been brought (down to earth) into the first sacred seat along the path of the Seat of Knowledge (*vidyāpīṭha*). It is the ultimate purport of the Subsequent Six Thousand (verses) of the Pure Division (*vimalabhedottaraṣaṭka*) in the division beginning with 'KĀ' in the venerable scripture of twenty-four thousand (verses) (known as) the *Svāminīmata* of the Supreme Lord's command as uttered within the Tradition of the Mother (*ambākrama*).

द्विषष्टानन्दः

श्रीकौलीश उवाच[१]

देवीनां[२] चैव सिद्धानां भूमिकार्थं मया[३] श्रुतम् ।
पञ्चरत्नस्य षट्कस्य[४] पञ्चकत्रिकभूमिका[५] ॥ १ ॥
कारुण्यात्[६] ब्रूहि[७] मन्त्रज्ञे कथं ज्ञानार्णवं भवेत्[८] ।

श्रीवक्रा उवाच[९]

पञ्चेन्द्रियगुणव्याप्तिः[१०] पञ्चरत्नोदयक्रिया[११] ॥ २ ॥
क्रियायोग[१२] समासेन[१३] पञ्चरत्नानि पञ्चसु[१४] ।

ब्रह्मा[१५] विष्णुस्तथा रुद्र ईश्वरश्च[१६] सदाशिवः[१७] ॥ ३ ॥
शिवकरणं[१८] चैकत्र चिरायुर्भवते[१९] तदा ।

पञ्चैतानि[२०] कलायुक्त्या[२१] पञ्चरत्नान्वितानि[२२] च ॥ ४ ॥
पञ्चमुद्राप्रयोगेण[२३] कारणं रत्नपञ्चकम् ।

रत्नैकं[२४] रत्नमध्यस्थं रत्नोदरपुटीकृतम्[२५] ॥ ५ ॥
रत्निकारत्नमासाद्य[२६] रत्नवज्जायते मनः[२७] ।

मनोरत्नं[२८] समैकत्वे[२९] स्थिरप्रकृतिबुद्धिमान्[३०] ॥ ६ ॥
तदा रत्नोदिताम्नाय[३१] ज्ञेयवृत्तिः[३२] प्रजायते ।

CHAPTER SIXTY-TWO

The Planes (of Realisation) of the Five Jewels

The venerable Kaulīśa said:

I have heard the (teaching) concerning the Siddhas and the goddesses in accord with the reality of the planes (of realisation) (*bhūmikārtha*). O knower of mantra, out of compassion (for the fettered), tell (me about) the plane of the Five Jewels, the group of six, the group of five and the three.[1] (In short) how is the ocean of knowledge?[2] (1-2ab)

The Yoga of Action relating to the Five Jewels

The venerable (goddess) Vakrā said:

The act of manifestation (*udaya*) of the Five Jewels is the (process of) pervasion of the powers (*guṇa*) of the five senses.[3] (I will tell you) in brief about the Yoga of Action and the Five Jewels within the (groups of) five. (2cd-3ab)

Brahmā, Viṣṇu, Rudra, Īśvara and Sadāśiva - when (this), Śiva's instrument (of mantra is brought together) in one place, (one acquires) long life.[4] (3cd-4ab)

These five, in accord with (their) energies (*kalā*), are linked to the Five Jewels. (Moreover) the Five Jewels (as a) group serves as the cause (of attainment) by applying the five gestures (*mudrā*) (when they are recited).[5] (4cd-5ab)

The one Jewel is in the midst of the Jewels and has been encapsulated (by them).[6] Once (that) Jewel, which is the one (energy of all) the Jewels, has been acquired, the mind (*manas*) becomes like a jewel. (5cd-6ab)

When the Jewel of the Mind is in a state oneness and equality, the wise man's nature (becomes) stable. Then the modality (of consciousness) which is the object of realisation (*jñeyavṛtti*) operates as the teaching that has arisen from the (five) Jewels. (6cd-7ab)

ज्ञानमध्यगतं[३३] ज्ञेयं[३४] व्याप्तिर्ज्ञेयान्तरे[३५] स्थिता ॥ ७ ॥
तदा पलितनिर्णाशं[३६] कल्पैकेन तु जायते[३७] ।
एवमाम्नाययोगेन पञ्चरत्नानि चाभ्यसेत्[३८] ॥ ८ ॥

विकल्पक्षीणचित्तस्य[३९] सिद्ध्यते तु रसायणम्[४०] ।
विकल्पमोहनाशे[४१] तु[४२] विकल्पस्त्वमने स्थितः[४३] ॥ ९ ॥

विकल्पस्य क्षयं कृत्वा[४४] तदा सिद्धिर्न[४५] संशयः ।
चान्द्रयोगमशेषात्मा[४६] प्रकृतिः स्वात्मपञ्जरम्[४७] ॥ १० ॥

गुणत्रयनिरोधेन दृश्यते चन्द्रवत् पदम्[४८] ।
चान्द्रचारक्षयं[४९] लक्षं[५०] रविलक्षं[५१] परित्यजेत्[५२] ॥ ११ ॥

त्यजनादपि शुक्राभ्यां[५३] परा व्याप्तिर्निगद्यते[५४] ।[५५]
परस्य[५६] परतत्त्वस्यापरतत्त्वं[५७] निराकृतम्[५८] ॥ १२ ॥

पराकाशे[५९] परो[६०] बिन्दुः[६१] पञ्चरत्नानि पञ्चकम् ।
तच्छक्तिपद्मगर्भस्थं[६२] त्रिकुलकुलवृक्षकम्[६३] ॥ १३ ॥

कुलवृक्षं[६४] च देवीनां ज्ञात्वा सिद्धो भवेन्नरः[६५] ।
भैरवं शक्तिगर्भस्थं[६६] त्रिकुलं षट्करोधितम्[६७] ॥ १४ ॥

गगनाकाशवत्[६८] तिष्ठेद्[६९] गगनं[७०] गगनोपमम्[७१] ।
गकारं गगनानन्दं[७२] गगनस्थं[७३] परामृतम्[७४] ॥ १५ ॥

(When) the object of knowledge is (experienced as being) within knowledge, the pervasion (of conciousness is experienced) within (every) object of knowledge. Then by (the power of a) single thought, (the yogi's) grey hairs are destroyed (and his youth is restored). In this way, one should practice the Five Jewels by means of the Yoga of the Tradition (*āmnāyayoga*).[7] (7cd-8)

One whose mind is free of thought constructs acquires the draught of immortality (*rasāyaṇa*). When the delusion of thought has been destroyed, thought is established in (the reality) devoid of mind (*amana*).[8] (9)

Once one has destroyed thought, (one) certainly (achieves) success (*siddhi*). The Yoga of the Moon is the Self of all things. Nature (*prakṛti*) is the cage of one's own Self. (10)

The (supreme) plane is perceived (beautiful) as the Moon by checking the three qualities (of Nature). The goal is to bring the motion of the Moon to an end. (Similarly), abandon the Sun as a focus of attention (*lakṣa*).[9] (11)

It is said that the supreme form of pervasion of the supreme principle (is achieved) by abandoning the two (flows of) vital seed (lunar and solar) even as the lower principle is abandoned. (12)

The Supreme Point in the Supreme Sky is the pentad (consisting of) the Five Jewels. It is the Kula Tree of the triple Kula within the womb of that Lotus of Power. (13)

A man achieves perfection (*siddha*) once he has known the Kula Tree of the goddesses.[10] Bhairava is in the womb of power and the triple Kula is fixed (in its place) by the group of six.[11] (14)

The Five Worlds of the Five Jewels

Gaganaloka

The Sky (*gagana*) (where the Yoginīs reside) is like the sky. It persists like the space of the sky.[12] The letter Ga is the bliss of the Sky. It is the supreme nectar in the Sky. (15)

सविसर्गं[75] विसर्गस्थं समनाम्बाधिकारकम्[76] ।

परापरपरा शक्ति:[77] पद्मपत्राक्षराक्षरम्[78] ॥ १६ ॥
अक्षरं[79] च पकाराख्यं[80] पवनाकृति चाक्षरम्[81] ।[82]

मकारं[83] कालपर्यन्तं[84] मकारं[85] शक्तिविग्रहम्[86] ॥ १७ ॥
आपूर्णं सर्वरत्नेषु[87] मकारं च[88] चतुर्थकम्[89] ।
मकाराकाशमध्यस्थं[90] स्वयं मातरविग्रहम्[91] ॥ १८ ॥

कलैर्युक्तं[92] नकाराख्यं[93] नकाराख्यमिति[94] ध्रुवम् ।
गसपमनरत्नान्ते[95] लीयते[96] च[97] परे पदे ॥ १९ ॥

पदपञ्चकभेदत्वाज्जीवनं[98] ब्रह्मग्रन्थिगम्[99] ।
परे[100] धाम्नि गत: शक्त्या[101] शक्तिविकरणात्मक:[102] ॥ २० ॥
करणेन्द्रियकर्मस्य[103] क्षयं कर्मस्य तत्क्षणात् ।

Svargaloka

The emission of (the letter) Sa is established in emission (*visarga*) and has authority over the Mothers of the Equal One (*samanā*).[13] (16ab)

Pavanaloka

The supreme energy that is both supreme (transcendent) and inferior (immanent) is the imperishable letter of the letters (*akṣarākṣara*) on the petals of the Lotus (of the Point).[14] The 'imperishable' (*akṣara*) is called the letter Pa. It is the letter whose form is the Wind (*pavana*). (16cd-17ab)

Martyaloka

The letter Ma (extends up to) the end of time. The form of the letter Ma is power (*śaktivigraha*). Filled (with vitality), amongst all the Jewels, the letter Ma is the fourth one. Located in the midst of the space of the letter Ma, it bears (spontaneously) of itself the form of the Mothers.[15] (18)

Nāgaloka

The (Jewel) called the letter Na is conjoined with the (all the) energies. The Stable One (*dhruva*) is the (Jewel) called the letter Na. (The individual soul) merges into the supreme plane at the end of the Jewels Ga, Sa, Pa, Ma and Na. (19)

Liberation

Life (*jīvana*) is located within (Vāgbhava) the Knot of Brahmā[16] by splitting apart the five planes (of the Five Jewels). (The individual soul) who is made up of the transformations of energy (*vikaraṇātmaka*) has entered the supreme abode along with power. (When this happens) the Karma of the one who is the activity (*karman*) of the senses is destroyed at that very moment.[17] (20-21ab)

सटकः[१०४] पटहश्चैव[१०५] साटकः[१०६] पटलस्तथा[१०७] ॥ २१ ॥
संयोगमुभयोर्ज्ञात्वा[१०८] चिरायुर्भवते[१०९] तदा ।

असृकपात्रसरोजत्व[११०] विरजज्ञानपर्वतः ॥ २२ ॥
कुलवृक्ष[१११] च देवीनां ज्ञात्वा सिद्धो भविष्यति[११२] ।

नर नार नगा[११३] चैका[११४] नर नारान्तकस्तथा[११५] ॥ २३ ॥
नरभावगति[११६] ज्ञात्वा तदा भावाभिषेचनम्[११७] ।
सेचन[११८] चाभिषेकस्य[११९] पिण्ड[१२०] क्षुभ्यति[१२१] तत्क्षणात् ॥ २४ ॥

आकाशं विमलानन्द[१२२] समुद्रादभिषेचन[१२३] ।
विभवानन्दयोगेन तदा मुक्तो दिगम्बरः ॥ २५ ॥

भरणादपि रत्नस्य विरजस्य[१२४] अभेदनम्[१२५] ।
यावच्चोत्पद्यतेऽवस्था[१२६] सा[१२७] चाज्ञा[१२८] रत्नपञ्चकम्[१२९] ॥ २६ ॥
निराशीकृतचित्तस्य[१३०] निरोधकरणाम्भसा[१३१] ।
ज्ञात्वा रत्नोपदेशं तु[१३२] रत्नाज्ञा[१३३] सिद्ध्यते ध्रुवम्[१३४] ॥ २७ ॥

रत्नैक[१३५] रत्नमध्यस्थं रत्नोदरपुटीकृतम्[१३६] ।
रत्नाक्षरं तु कौलीश[१३७] कौलिक[१३८] रत्नपञ्चकम् ॥ २८ ॥

एवमाद्यावतारं तु श्रीमच्चन्द्रपुरोद्धतम्[१३९] ।
आद्यं तव[१४०] मया प्रोक्त[१४१] पञ्चरत्नं रसायणम्[१४२] ॥ २९ ॥

रत्नोदरपरानन्द[१४३] विकासं चैव[१४४] चिन्मयम् ।
मनोरत्नकलाढ्यं च[१४५] रत्नमेक[१४६] परापरम् ॥ ३० ॥

The Sonic Energies of the Five Jewels and their Formation[18]

Sa, Ṭa, Ka and Pa, Ṭa, Ha along with Sā, Ṭa, Ka and Pa, Ṭa, La[19] - one (is destined to have) a long life, if one known's how they are both united.

(21cd-22ab)

The Lotus of the Vessel of Blood and the Luminous (*viraja*) Mountain of Knowledge[20] - one will be successful once one has known the Kula Tree of the goddesses.[21] (22cd-23ab)

NARA, NĀRA, NAGĀ, and one NARA followed by NĀRĀNTAKA, then the consecration of Being (*bhāvābhiṣeca*)[22] (takes place) once known RAGA[23] BHĀGAVATI. (This is) the sprinkling of the consecration. (Then having exhaled and inhaled)[24] the body is aroused in that very moment. (23cd-24)

The Sky is pure bliss, the consecration from the Ocean (of Knowledge).[25] Then, by the union of the bliss of generation (*vibhavānadayoga*), the (Yogi) clothed with the Void (*digambara*) is liberated. (25)

Again, by filling the Jewel and the oneness of (Bhairava), the luminous one, a state arises which is the Command corresponding to the Five Jewels for one whose mind has been freed of craving by means of the water that checks (the fluctuation of the mind) (*nirodhakaraṇa*). Once known the teaching of the Jewel, the Command of the Jewel is certainly successful.[26] (26-27)

The syllable AIṀ - the Great Jewel and the Sixteen Lunar Vowels of the Five Jewels

(Vāgbhava) the one Jewel is in the midst of the Jewels and has been encapsulated (by them).[27] The letter of the Jewel is Kaulīśa, the group of Five Jewels is Kaulika.[28] (28)

In this way the primordial descent (into the world) (*ādyāvatāra*) (of Kaulīśa) has been extracted from (the Point which is) the venerable City of the Moon. I have told you about the Five Jewels, which is the foremost (*ādya*) alchemical potion. (29)

Within the Jewels is supreme bliss and the (state of) expansion which is consciousness. The Jewel, is the supreme (transcendent) and inferior (immanent) (reality), endowed with the energy of the Jewel of the Mind.[29] (30)

गुहान्तस्थ[१४७] महारत्नं एक[१४८] षोडशधा[१४९] स्थितम् ।
षोडशाक्षरभेदत्वाद्[१५०] ऐंकारं रत्नमक्षयम्[१५१] ॥ ३१ ॥

षोडशभिश्च[१५२] संतिष्ठेद्[१५३] भवभेदं मनोत्तरम्[१५४] ।
योन्यार्णवं च[१५५] ऐंकार[१५६] ईकाराक्षरभूषितम्[१५७] ॥ ३२ ॥
कलियुगे[१५८] स्थिता:[१५९] सार्धं[१६०] कुमुदस्थसुतेजसा[१६१] ।

अ आ इ ई चतूरत्ना[१६२] अग्रस्था:[१६३] कामरूपके ॥ ३३ ॥

उ ऊ ऋ ॠ च रत्नस्था दक्षस्था[१६४] जालरूपगा:[१६५] ।
त्रेतायुगसमुद्भूता दक्षकौमारभूषणा:[१६६] ॥ ३४ ॥

ऌ ॡ ए ऐ चतूरत्ना[१६७] वामस्था:[१६८] पूर्णदेवता:[१६९] ।
द्वापरयुगमासाद्य[१७०] शेखराज्ञासमुन्नता:[१७११७२] ॥ ३५ ॥

ओ औ अं अ: चतूरत्ना[१७३] मध्यस्थाश्च[१७४] उडालये[१७५] ।
कृते[१७६] युगेऽक्षरा भान्ति[१७७] खेचराज्ञा स्वयंप्रभा ॥ ३६ ॥

एवं षोडशधा[१७८] रत्ना:[१७९] कलारत्नानि[१८०] षोडश[१८१] ।
कथितास्तु[१८२] क्रमात्[१८३] सर्वे[१८४] प्रधाना रत्नपञ्चका:[१८५] ॥ ३७ ॥

अकारं च इकारं च[१८६] ए ऐ[१८७] रत्नोदयेषु[१८८] च ।
अ:कार:[१८९] पञ्चमो[१९०] ह्येते[१९१] पञ्चरत्नप्रदीपका: ॥ ३८ ॥

चन्द्रपूर्यक्रमायाता:[१९२] पञ्चैते[१९३] पञ्चविंशति:[१९४] ।
उद्धृता[१९५] दशभिर्भेदैर्ज्ञात्वा[१९६] परपदं लभेत्[१९७] ॥ ३९ ॥

साटक: पटकश्चैव सावक: पटहस्तथा[१९८] ।
टटह:[१९९] पटहानन्द[२००] पञ्चरत्नोपदेशकम्[२०१] ॥ ४० ॥

Located within the Cave, it is the one Great Jewel[30] with sixteen aspects. Conjoined as it is with the sixteenth vowels, the syllable AIṀ is the imperishable Jewel. (31)

The condition (*bhavabheda*) (formed) with the sixteen (vowels) is beyond mind. The syllable AIṀ is the Ocean of the Yoni. It is adorned with the letter Ī.[31] In the Age of Strife, all (the vowels) abide (within it) along with the radiant energy within the white lily (*kumuda*) (of the Point). (32-33ab)

1) The four Jewels A, Ā, I and Ī are in the fore part (of the Triangle) in Kāmarūpaka. (33cd)

2) The (letters) U, Ū, Ṛ and Ṝ in the Jewels are in the south in Jālandhara's form (*jālarūpa*). Generated in the Tretā Age, they are the ornament of the Kaumāra (mountain) in the south. (34)

3) The four Jewels, ḷ, Ḹ, E and AI are the deities of Pūrṇa and are located in the north. Having reached the Dvāpara Age, they are elevated by the Command at the summit (of existence). (35)

4) The four Jewels, O, AU, AṀ and AḤ are in the middle, in the abode of Uḍa. (These) letters shine in the Kṛta Age. The Command of the Skyfarer is self-luminous. (36)

In this way, the Jewels are of sixteen kinds. The Jewels of the energies are sixteen.[32] (Thus) I have told (you) about all the main groups of Five Jewels, in due order.[33] (37)

The letters A and I and E and AI amongst the arising of the Jewels and the letter AḤ as the fifth - these are the energizers of the Five Jewels.[34] (38)

These five (along with the other letters) that have come from the transmission of the City of the Moon make twenty-five.[35] They are extracted with ten divisions. Having known (this), one attains the supreme plane. (39)

The Combinations of the States and Sonic Energies of the Five Jewels

Sā, Ṭa, Ka along with Pa, Ṭa, Ka and Sā, Va, Ka and Pa, Ṭa, Ha, (this along with) Ṭa, Ṭa, Ha the bliss of Pa, Ṭa and Ha is the teaching concerning the Five Jewels.[36] (40)

अहिमध्यस्थितं[२०२] रत्नं[२०३] रत्नमध्यस्थितो[२०४] रविः[२०५] ।
तदा रत्नेश्वराख्यो हि[२०६] विख्यातो वक्रिकामते[२०७] ॥ ४१ ॥

कुम्भं कुम्भात्[२०८] परं कुम्भं रविकुम्भाक्षरादिषु[२०९] ।
आदिवर्गकलाः[२१०] भेद्य[२११] पञ्चव्याप्तिः[२१२] प्रवर्तते ॥ ४२ ॥

आवृतिस्त्रिगुणावस्था[२१३] वृत्तिः[२१४] प्राणात्मिका[२१५] भवेत् ।
भावनानन्दचैतन्यं[२१६] रत्ननाथाधिकारकम्[२१७] ॥ ४३ ॥

अरत्नस्य तरत्नस्य रत्नयोर्मणिपुद्गलम्[२१८] ।
पुद्गलान्ते[२१९] स्थिता रत्ना आनन्दं[२२०] मणिरत्नकम्[२२१] ॥ ४४ ॥

मणिरत्नोऽस्य रत्नस्य रत्नस्य मणिबन्धकम् ।[२२२]
मणिरत्नप्रयोगेन[२२३] रत्नयोगमुदाहृतम्[२२४] ॥ ४५ ॥
रत्नस्य तु विचित्रस्य[२२५] मणिरत्नप्रकाशकः[२२६] ।

विपरीतक्रमादेव मणिरत्नं[२२७] च[२२८] काञ्चनम् ॥ ४६ ॥
काञ्चनं च[२२९] हिरण्यस्य[२३०] हिरण्यं ब्रह्मबीजकम्[२३१] ।
ब्रह्मनाडीविभेदेन[२३२] ब्रह्मजीवोपदेशकम्[२३३] ॥ ४७ ॥
उपदेशोऽपवर्गस्य[२३४] विरजस्य च गोलकम्[२३५] ।
ब्रह्मांशकविशुद्धेन[२३६] ब्रह्मवेधं सदोदितम्[२३७] ॥ ४८ ॥

सदोदितचिदा[२३८] भाति[२३९] उन्मत्तब्रह्मचर्यकम्[२४०] ।
ब्रह्मचर्यं[२४१] च विमलं[२४२] व्रतमेतच्च[२४३] पञ्चकम्[२४४] ॥ ४९ ॥

The Jewel is in the middle of the Snake (Kuṇḍalinī). The Sun is in the middle of the Jewel.[37] Then it is called the Lord of the Jewels, who is well known in the *Vakrikāmata.* (41)

The jar (*kumbha*) that (comes) from the jar is the Supreme Jar amongst the letters etc of the Jar of the Sun.[38] The pervasion of the five (Jewels) takes place by dividing up the energies of the (vowels which are the) first class (of letters).[39] (42)

The state of the three qualities is that of a continuous cyclic return (*āvṛti*) and the activity (*vṛtti*) is that of the breath. The authority of the Lord of the Jewels is the consciousness of the bliss of contemplation. (43)

The gem of the individual soul (*maṇipudgala*) is that of two Jewels, namely, the Jewel A and the Jewel Ta. The Jewels are within the individual soul. Bliss is the Jewel of the Gems (*maṇiratnaka*).[40] (44)

(This is) the Jewel of the Gems (*maṇiratna*) of this Jewel, the jewel bracelet (*maṇibandhaka*) of the Jewel. It is called the Yoga of the Jewels by the application (*prayoga*) of the Jewel and the Gems.[41] The Jewel of the Gems illuminates the wonderfully varied (*vicitra*) Jewel (which is the Five Jewels in unity).[42] (45-46ab)

By the reverse sequence (one attains) the Jewel of the Gems and Gold.[43] (This gold is) the Gold (*kāñcana*) of the Golden One (*hiraṇya*). The Golden One is (Vāgbhava) the seed-syllable of Brahmā. It teaches (the nature of) Brahmā and the living soul by splitting apart the Channel of Brahmā. It is the teaching concerning liberation and is the Ball of (Bhairava) the Luminous One (*viraja*). The piercing of (the Cavity of) Brahmā (at the apex of immanence) takes place constantly impelled by the pure aspect of Brahmā (which is his energy).[44]
(46cd-48)

The practice of celibacy mad (with passion) (*unmattabrahmacaryaka*) is made manifest by (this liberated and) perpetually active consciousness. The pure practice of celibacy is the Vow[45] and that is the group of five (Jewels). (49)

एवं ब्रह्माक्षराकाशं आकाशमिति[२४५] पञ्चधा[२४६] ।
पञ्चधात्मासमायुक्तं[२४७] पञ्चात्मन:[२४८] प्रकाशकम्[२४९] ॥ ५० ॥

आकाशं[२५०] पञ्चधा भित्त्वा[२५१] व्योमं[२५२] भित्त्वा तु[२५३] पञ्चधा ।
पञ्चधाज्ञानमेकत्र[२५४] पञ्चपञ्चोपदेशकम्[२५५] ॥ ५१ ॥

पञ्चपञ्चात्मिका[२५६] शक्ति:[२५७] पञ्चपञ्चात्मिका क्रिया[२५८] ।
पञ्चपञ्चकलाव्याप्ति:[२५९] पञ्चरत्नानि[२६०] चोच्चरेत्[२६१] ॥ ५२ ॥

विसर्गस्थं यदा[२६२] रत्नं तुर्यस्थं रत्नपञ्चकम् ।
मुद्रापञ्चकयोगेन[२६३] अध्वानं[२६४] रत्नपञ्चकम्[२६५] ॥ ५३ ॥

नाडीरत्नत्रयं[२६६] शोध्य[२६७] एका नाडी विशिष्यते[२६८] ।
शुद्धाशुद्धं[२६९] पुरं कृत्वा[२७०] विशुद्धिर्जायते[२७१] तदा ॥ ५४ ॥

शिवीकरणचित्तस्य[२७२] शिवा[२७३] नि:संगता[२७४] वपु:[२७५] ।
स्थिरां पिण्डगतिं[२७६] लब्ध्वा[२७७] तदा[२७८] वै[२७९] ब्रह्मचर्यकम् ॥ ५५ ॥

व्रतं चर्या व्रतं[२८०] शक्तिर्व्रतं[२८१] चैकत्वतां गतम्[२८२] ।
सुगतिविद्धचित्तस्य[२८३] चैतल्लिङ्गगतिर्भवेत्[२८४] ॥ ५६ ॥

एवं रत्नोपदेशं तु[२८५] यत्रस्थं[२८६] रत्नपञ्चकम्[२८७] ।
एवं[२८८] पञ्चोपदेशं तु वृक्षे तु[२८९] पश्चिमे गृहे[२९०] ॥ ५७ ॥

The Five groups of Five[46]

1) In this way Space is the Space of (Vāgbhava) the letter of Brahmā and is fivefold. 2) Conjoined with the fivefold Self, it illumines 3) the Self of the five (energies). (50)

Once burst through 4) the fivefold Space (*ākāśa*) (of the worlds) and 5) the fivefold Sky (*vyoman*) (of the elements), the fivefold knowledge (all together) in one place is the teaching of the five (groups of) five. (51)

Power consists of (these) twenty-five. Action consists of (these) twenty-five. (It is) the pervasion of the twenty-five energies (*kalā*). (Thus) one should utter the Five Jewels. (52)

The Vow of the Five Jewels

If the Jewel is established in emission, then the Five Jewels are established in the fourth (state).[47] By uniting (them) with the Five Gestures,[48] the group of Five Jewels (becomes) the (cosmic) path.[49] (53)

Once the three Jewels of the channels (*nāḍīratnatraya*) have been purified, the one channel remains (*viśiṣyate*).[50] Then, having made the impure abode pure, the pure condition (*viśuddhi*) arises. (54)

The body of one whose mind (is engaged) in transforming (all things) into Śiva is propitious (to realisation) and detached.[51] (An authentic) state of continence (is attained only) when one has achieved a stable corporeal state (*sthirā piṇḍagati*). (55)

The Vow (of the Five Jewels)[52] is (right Kaula) conduct (*caryā*). The Vow is power (*śakti*) and it has attained a state of oneness. That is the (stable) state (*gati*) of the subtle body (*liṅga*) of one whose mind is shot through (*viddha*) with bliss (*sugati*).[53] (56)

The Tree of the Five Jewels

Such is the teaching concerning the Jewels. The Five Jewels are located where the teaching concerning the five is, namely, on (Vāgbhava) the Tree in the Western House.[54] (57)

पश्चिमगृहनाथस्य[२९१] वृक्षमूर्तिर्भगोदरे[२९२] ।
भगस्योदरवृक्षं[२९३] तु यत्रस्थं[२९४] रत्नपञ्चकम् ॥ ५८ ॥

वृक्षान्तर्भावितानन्दो[२९५] रत्नवृक्षं[२९६] तदुच्यते ।
तदेयं पञ्चरत्नस्य कैलासोपरिसंस्थितम्[२९७] ॥ ५९ ॥

एवं[२९८] मन्त्रोदयौघं[२९९] तु[३००] विख्यातं रत्नपञ्चकम्[३०१] ।
एकानेकविभेदैस्तु[३०२] गोत्रं[३०३] तत् पञ्चरत्नकम् ॥ ६० ॥

गोत्रलिङ्गं[३०४] तदाकारं भेदै:[३०५] षोडशभि:[३०६] स्थितम्[३०७] ।
पञ्चरत्नविभेदेन[३०८] गोत्रममरिकाक्रमम्[३०९] ॥ ६१ ॥

क्रमान्ते[३१०] क्रममध्यस्थं पञ्चरत्नं शिवेच्छया ।
पराकाशप्रयोगेन[३११] तदानुष्ठानसंग्रहम्[३१२] ॥ ६२ ॥

स्वकुलस्य अधिष्ठानं[३१३] अधिष्ठानं च[३१४] भैरव:[३१५] ।
तच्च[३१६] पञ्चप्रकारं तु[३१७] पञ्चविंशात्मकं[३१८] कुलम्[३१९] ॥ ६३ ॥

कुलरत्नं कुलेशस्य[३२०] कुलमार्गक्रमादपि[३२१] ।
विचारं षड्विधं[३२२] कृत्वा तदा ज्ञानोपदेशकम्[३२३] ॥ ६४ ॥

दृढलक्षं स्मृतं ज्ञानं[३२४] ज्ञानं च[३२५] दृढलक्षणम्[३२६] ।
लक्षलक्षणमध्यस्थं[३२७] ज्ञानं तत्त्वस्वरूपत:[३२८] ॥ ६५ ॥

कारणैकं[३२९] मनो विद्वान्[३३०] तूष्णीमध्यगतं मन:[३३१] ।
तदा निर्वाणमायाति विभवानन्दकौलिकम्[३३२] ॥ ६६ ॥

The form (*mūrti*) of the Tree of the Lord of the Western House is within the Yoni. The Tree within the Yoni is where the group of Five Jewels is located.[55] (58)

The bliss internally contemplated within the Tree is said to be the Tree of Jewels. That (Tree) of the Five Jewels is on the top of Kailāsa.[56] (59)

In this way, the Five Jewels have been explained as the current of the arising of mantra. That is the clan of the Five Jewels with both its single and multiple varieties (*ekānekavibheda*). (60)

It is the Liṅga of the Clan (*gotra*), the form of which is divided into sixteen aspects.[57] The clan is the Transmission of Amarikā (the Imperishable Goddess).[58] (This is so) by virtue of the division of the Five Jewels.[59] (61)

The group of Five Jewels is, by Śiva's will, in the middle of the Krama and within the Krama.[60] It is worshipped (*anuṣṭhāna*) by applying the Supreme Space. (62)

(The Supreme Space) is the foundation (*adhiṣṭhāna*) of its own Kula and the foundation is Bhairava. And that (Space) is of five types (constituting) the Kula of twenty-five.[61] (63)

(Vāgbhava) the Jewel of Kula belongs to (Bhairava) the Lord of Kula. Having generated the awareness (*vicāra*) which is of six types also from the (root) transmission of the Path of Kula[62] then (one attains) the teaching that imparts (supreme) knowledge.[63] (64)

A firm mark (that is, a clearly understood object) is said to be knowledge[64] and knowledge is its firm (and certain) characteristic (*dhṛdhalakṣaṇa*). Knowledge in its true (ultimate) nature is in the centre between the mark and its characteristic. (65)

The one cause (of all things) is the mind (*manas*), the learned one. The mind is within (Vāgbhava) the Silent One.[65] (When one realises this) then *Nirvāṇa* comes, which is the Kaula (union of Śiva and Śakti that gives rise to) the Bliss of Generation (*vibhavānanda*). (66)

कौलीशस्य[३३३] तु[३३४] मध्यस्थं[३३५] कमलाकृतिगोलकम् ।
स च वै कौलिकानन्दः[३३६] सकलं[३३७] तत् प्रगीयते[३३८] ॥ ६७ ॥

सकलं निष्कले[३३९] कृत्वा[३४०] निष्कलं[३४१] सकलात्मनि[३४२] ।
तदा योगः प्रवर्तेत[३४३] शान्तज्ञानोपदेशकः[३४४] ॥ ६८ ॥

खर्परैकं[३४५] कपाटं[३४६] तु कपाटस्य तु खर्परम्[३४७] ।
खर्परैकः[३४८] परो भावः[३४९] अन्ते व्याप्तिः [३५०]स्फुटीकृता[३५१] ॥ ६९ ॥

खर्परस्य[३५२] खकारस्य उदितो[३५३] वै[३५४] शशिर्यदा[३५५] ।
तदा सा शाम्भवीमूर्तिर्भावग्राह्या प्रपद्यते[३५६] ॥ ७० ॥

खकारस्य मकारं तु[३५७] मकारस्य सकारकम्[३५८] ।
सकारान्ते[३५९] हकाराख्यं[३६०] हकारान्ते[३६१] विसर्गयोः ॥ ७१ ॥

पञ्चरत्नस्य[३६२] पात्रेदं[३६३] अष्टात्रिंशत्कलायुतम्[३६४] ।
मुद्रापञ्चकसंपूर्णं[३६५] शशिपात्रमुदाहृतम्[३६६] ॥ ७२ ॥

आपूर्णगतिचित्तस्य[३६७] मकारं[३६८] संप्रयोजयेत् ।
ऊ:र्धचन्द्रपुरं[३६९] कृत्वा वीरसिद्धिर्भवेत्[३७०] तदा ॥ ७३ ॥

वीरवीरेन्द्रयोगीनां[३७१] रत्नं[३७२] रत्नाकरादपि[३७३] ।
टकाराक्षरमध्यस्थं[३७४] वीरशूलप्रकाशकम्[३७५] ॥ ७४ ॥

अस्यैव रत्नपिण्डस्य[३७६] सहजौजपदाङ्किताम्[३७७] ।
कलां[३७८] सप्तादशीं[३७९] कृत्वा वीरपाशान्[३८०] निकृन्तयेत्[३८१] ॥ ७५ ॥

The Ball, in the form of a Lotus, is in the centre of the Lord of Kaula.[66] Indeed that is Kaulika bliss, which is said to be (its) differentiated (*sakala*) (aspect). (67)

Having placed the differentiated (*sakala*) into the undifferentiated (*niṣakala*) and the undifferentiated into the differentiated then (that form of) Yoga arises that teaches the knowledge of the (one) tranquil (reality) (*śāntajñāna*).[67] (68)

The Five Jewels of the syllable HSKHPHREṀ

The one Skull is the Door Panel. It is the Skull of the Door Panel. The Skull (*kharpara*) is the one supreme state of being. (Thus the state of) pervasion within (*ante*) has (then) been made clearly manifest.[68] (69)

If the Moon of the letter Kha of the Skull (*kharpara*) has risen (and is active) (*udita*), then the form (*mūrti*) of Śambhu's energy (Śāmbhavī) can be grasped (in her essential) being (*bhāvagrāhyā*).[69] (70)

The letter Ma belongs with the letter Kha and the letter Sa belongs with the letter Ma. The one called the letter Ha is at the end of the letter Sa. The one at the end of the letter Ha is in the two emissions (*visarga*) (Ḥ).[70] (71)

This is the Vessel of the Five Jewels. It has thirty-eight energies (*kalā*).[71] Completely filled with (the energies of) the five Gestures, it is called the Vessel of the Moon. (72)

One should apply the letter Ma of the mind whose dynamic state is complete (*āpūrṇagati*). Then, once fashioned the City of the Half-moon, (one attains) the hero's accomplishment (*vīrasiddhi*).[72] (73)

The Jewel of the the yogis who are heroes and lords of the heroes (has comes) from the (Triangle which is the) mine of jewels.[73] The one who illumines the hero's spear (*vīraśūla*) is in the middle of the imperishable letter Ṭa.[74] (74)

Once fashioned the seventeenth energy of this Body of the Jewel (*ratnapiṇḍa*), marked with the plane of innate vitality (*sahajaujapada*), one should burst asunder the hero's fetters. (75)

खकारं[३८२] च[३८३] फकारं[३८४] च रकारतेजबृंहितम्[३८५] ।
पञ्चपीठेश्च संभेद्य वह्निविषनियोजितम्[३८६] ॥ ७६ ॥
कर्तरी[३८७] सा समाख्याता[३८८] पाशस्य[३८९] त्रिविधस्य[३९०] च ।

शोधनी[३९१] देवता काली [३९२]मर्मभेदपुरान्तिका[३९३] ॥ ७७ ॥

कमलं[३९४] कर्तरीशस्य[३९५] विषस्य अमृतालयम् ।
प्रयोगेदं[३९६] पुरा[३९७] शोध्यं[३९८] अभक्ष[३९९] भक्षयेत्[४००] तदा ॥ ७८ ॥

सुविलीनगतैर्भावैर्मुक्तोऽमुक्तो[४०१] न संशयः[४०२] ।
निःसंशयमतिं[४०३] कृत्वा तदा कारणमादिशेत्[४०४] ॥ ७९ ॥

षट्त्यागात्[४०५] सप्तमे मुक्तिः[४०६] पञ्चत्यागाद्[४०७] जितो[४०८] मनः ।
भवने[४०९] नित्ययोगीनां[४१०] रौद्रीं[४११] ज्ञात्वा[४१२] पदं[४१३] लभेत् ॥ ८० ॥

आर्णवस्य[४१४] अशेषस्य अमरिका[४१५] परा[४१६] क्रिया ।
सर्वद्वन्द्वपरित्यागात् हृदयं[४१७] लभते[४१८] नरः ॥ ८१ ॥

करवीरं करवीरं करवीरकरं[४१९] तथा ।
विकरालं[४२०] करालं च कराली[४२१] पुनः[४२२] कर्तरी ॥ ८२ ॥
उदयं[४२३] संप्रदायं[४२४] तु[४२५] संवर्तं[४२६] कर्तरीकरम्[४२७] ।
कर्तरी मेरुमाला तु[४२८] कपालं[४२९] कर्तरीयुतम् ॥ ८३ ॥

कर्तृत्वे करणं ज्ञानं कार्यकारणयोगतः[४३०] ।
तदा सा परमा शक्तिः संवर्तं[४३१] करवीरकम्[४३२] ॥ ८४ ॥

विपरीतस्य[४३३] वृक्षस्य यदा जायेत[४३४] कौलिकी[४३५] ।
तदा उभयमेलापं[४३६] रत्नानां च परस्परम्[४३७] ॥ ८५ ॥

The letter Kha and the letter Pha intensified with the radiant energy (*tejas*) of the letter Ra, united with the five sacred seats (of the *Praṇavas*) and conjoined with Fire (Ha) and Poison (Sa) is said to be the Scissors (*kartarī*)[75] of the threefold bondage (*pāśa*).[76] (76-77ab)

(She is) Kālī, the deity who purifies and destroys the abode (of the body with its) diverse vulnerable points (*marman*).[77] (77cd)

The Lotus of Kartarīśa, the Lord of the Scissors, is the abode of the nectar of poison (*viṣa*) (the state of pervasion). This method should be purified first, then one should eat what cannot be eaten.[78] (78)

With (the host of) existing things well merged (in the one absolute reality), one who is bound (*amukta*) is undoubtedly free (*mukta*). Then, having freed the mind from doubt, one should teach the cause (*kāraṇa*) (of liberation).[79] (79)

Liberation is (attained) on the seventh (plane) by abandoning the (first) six. By abandoning five,[80] the mind is conquered.[81] Once one has known Raudrī within the eternal abode of (realised) yogis, one attains the (supreme) plane. (80)

Amarikā (the Immortal Goddess)[82] is the supreme activity of the entire ocean (of the Yoni). By abandoning all duality man attains the Heart (of the deity). (81)

The Cremation Ground

Karavīra, Karavīra and Karavīraka, Vikarāla, Karāla, Karālī and, again, Kartarī (the Scissors),[83] the Dawn (*udaya*), the Tradition (*saṁpradāya*), Saṁvarta and the Ray of the Scissors (*kartarīkara*), the Scissors, the Rosary of Meru[84] and the Skull conjoined with the Scissors. (82-83)

When (the power of the agent, that is, his) agency is present (and functioning), mantra (*karaṇa*) is the noetic consciousness (*jñāna*) engendered by the union of the (universal) cause and (its) effect. Then that same supreme power is Saṁvarta which is Karavīraka.[85] (84)

When the Kaulikī (power) of (the goddess's syllable), the inverted Tree arises, then the union (*melāpa*) takes place of both (the instrument and the agent) and of the Jewels with one another. (85)

परस्परमनो माया[४३८] पश्यते[४३९] च गमागमम्[४४०] ।
परापरप्रभेदस्य[४४१] परापरपरस्य[४४२] च ॥ ८६ ॥

एवं परस्परं ज्ञानं उदयास्तमनोभयो:[४४३] ।
महदाकाशगा[४४४] मूर्तिरपरपरमूर्तिमान्[४४५] ॥ ८७ ॥
तदा ज्ञानशलाका च[४४६] मूर्तामूर्ता ह्युभौ[४४७] क्रमात् ।

गमूर्तश्च समूर्तश्च[४४८] पमूर्तमनिलस्य[४४९] तु ॥ ८८ ॥
ममूर्तमपरं तत्त्वं[४५०] नमूर्तं[४५१] पञ्चमं[४५२] पदम् ।

मूर्तिपञ्चपुरैकत्वान्मथनादपि[४५३] रश्मय:[४५४] ॥ ८९ ॥
वर्तते च गुणावाप्ति:[४५५] समुद्रादिव[४५६] मन्थनात्[४५७] ।

मन्त्रो[४५८] मन्त्रोत्तरा मुद्रा[४५९] मन्त्रमुद्रा च कर्णिका ॥ ९० ॥
विकराला च मुद्राख्या[४६०] प्रयोगं मन्थनात्मन:[४६१] ।

विपरीतगतिज्ञानं[४६२] विपरीतं च सिंहकम् ॥ ९१ ॥
विपरीतमनामा[४६३] च विपरीतक्रमात् क्रमम्[४६४] ।
तत्रैव चापरं ज्ञानं[४६५] श्लोकानि[४६६] द्वादशानि च[४६७] ॥ ९२ ॥

श्मशानं[४६८] वीरसिद्धानां[४६९] चक्रमेलापकारणम्[४७०] ।
कुर्यात्[४७१] तन्मन्त्रमार्गे तु[४७२] विद्यैका[४७३] षट्सु[४७४] भेदत: ॥ ९३ ॥

The mind (based on) mutual (reciprocal relationship) (*parasparamanas*) is Māyā, that perceives the coming and going (of the energy of the deity to and fro from the Void that relate to) the division into supreme and inferior of the supreme (reality) which is both supreme (transcendent) and inferior (immanent).[86] (86)

Such is (their) mutual knowledge (of one another), namely, (the knowledge of) the arising and falling away of both (in consonance with the rythmn of creation and destruction). (Thus) the form (*mūrti*) (of the deity) present in the Void of Power (*mahadākāśa*) possess (both) a supreme (transcendent) form and a lower (immanent one). Then (the syllable of the goddess) the Scalpel of Knowledge (*jñānaśakākā*) is both with form and without form, successively (one after another). (87-88ab)

The (principle whose) form is Ga and the one whose form is Sa (along with) the one whose form is Pa, which is Fire. The one whose form is Ma is the lower (immanent) principle and the one whose form is Na is the fifth.[87]

(88cd-89ab)

By virtue of the unity of the abode of the five forms and by churning (it to arouse their power), rays (of energy issue from them and) one acquires (divine) qualities just as (precious things are produced) from the (cosmic) ocean by churning (it). (89cd-90ab)

(The Gestures corresponding to the five) are Mantra, Mantrottarā, Mantramudrā, Karṇikā, and the Gesture called Vikarāla (all of which are part of) the application of the churning (that arouses the energies of the Jewels).[88]

(90cd-91ab)

Knowledge (of these mantras) is in a reverse modality (*viparītagati*). The (mantra of the) Lion is in reverse and the mind which is the New Moon is in reverse. (Indeed the entire) Krama is in the reverse sequence.[89] Again, the other (*apara*) knowledge that is (also present) there is (the mantra called) the Twelve Verses.[90] (91cd-92)

One should fashion the cremation ground of the accomplished heroes (*vīrasiddha*) which is the cause of the union that takes place in the Wheel (*cakramelāpa*). (Thus), on that Path of Mantra,[91] there is (only) one Vidyā which is divided into the six (parts of the Krama).[92] (93)

दीपक[४७५] पञ्चरत्नस्य पात्रस्य कमलस्य[४७६] च ।
मुद्रा पञ्चशलाका[४७७] या[४७८] नाभिरेकाक्षरा भवेत्[४७९] ॥ ९४ ॥
पञ्च[४८०] कुर्याच्च[४८१] आद्यन्ते[४८२] पञ्चरत्नैश्च[४८३] योजिता:[४८४] ।
वीरवृत्तिस्तदा[४८५] भाति[४८६] वीरो वीरत्वमिच्छति[४८७] ॥ ९५ ॥

वीरपञ्चकपञ्चानां[४८८] पञ्च वीरा[४८९] क्रमान्वये[४९०] ।
अन्वयं[४९१] पञ्चधा[४९२] ज्ञात्वा वीरसिद्धिश्च[४९३] पञ्चधा[४९४] ॥ ९६ ॥

वीरमुद्रा तथा चैका[४९५] वीरैका मुद्रमालिनी[४९६] ।
भवच्छेदकरी[४९७] माया षड्विधा[४९८] ज्ञेया[४९९] मालिनी ॥ ९७ ॥

मालिनी पञ्चकान्तस्था[५००] ऐँकाराक्षरदीपिता[५०१] ।
षड्भिर्भेदक्रमं[५०२] देव[५०३] युग्मपञ्चविपर्ययात्[५०४] ॥ ९८ ॥

कारणं[५०५] पञ्चरत्नानां लिङ्गैकं[५०६] षट्प्रभेदत:[५०७] ।
मूलभूतं क्रमाचारं[५०८] ज्ञात्वा पञ्चोपदेशकम्[५०९] ॥ ९९ ॥

पञ्चपञ्चकमध्यस्थं[५१०] पञ्च पञ्चाक्षराणि[५११] च ।
निरपेक्ष:[५१२] परो[५१३] भाव:[५१४] दुर्विज्ञं[५१५] रत्नपञ्चकम्[५१६] ॥ १०० ॥

दुर्गमस्य उपायं तु[५१७] कदम्बाख्यं[५१८] विसर्गयो:[५१९] ।
करणान्तर्गता[५२०] शक्ति: शक्ति:[५२१] कर्णान्तरे[५२२] स्थिता ॥ १०१ ॥

शक्ति: कर्णं[५२३] तथा मन्त्रं[५२४] ज्ञात्वा तूष्णीशमाचरेत्[५२५] ।
तूष्णीमध्यगतस्तूष्णी[५२६] स[५२७] च ऐँकारसंज्ञया[५२८] ॥ १०२ ॥

The energizer (*dīpaka*) of the Five Jewels,[93] the Vessel (*pātra*),[94] the Lotus,[95] and the Gesture,[96] which is the scalpel of the five (Jewels), and the navel (*nābhi*), which is the (Vidyā of) one syllable.[97] Again, place the Five (*Praṇavas*) at the beginning and end conjoined with the Five Jewels.[98] Then the hero's state (*vīravṛtti*) becomes manifest.[99] (Indeed) a hero desires the condition of a hero. (94-95)

In the Krama lineage (*anvaya*)[100] there are five heroes of the five groups of five heroes.[101] Once one has known the fivefold lineage, the accomplishment of the hero (*vīrasiddhi*)[102] is fivefold. (96)

Again, the Gesture of the Heros (*vīramudrā*) is one. (There is) one heroine (*vīrā*), namely, the Mālinī of Gesture (*mudramālinī*). One should know that Mālinī, who is of six kinds, is Māyā who cuts through (fettered) existence.[103] (97)

Mālinī is at the end of the group of five (*Praṇavas*) energized by the syllable of the letter AIṀ. O god, the Krama is (formed) with the six divisions and by reversing the pair of five (*praṇavas*) (*yugmapañcaviparyaya*).[104] (98)

(Thus, Vāgbhava) the one Liṅga with six divisions is the cause of the Five Jewels. (This can be understood) once one has known the practice of the Krama (*kramācāra*) which is the root (of all the mantras) and the teacher of the five.[105] (99)

It is hard to know the Five Jewels in the midst of the five groups of five[106] and the five (groups of) five letters. Independence (*nirapekṣa*) is the supreme condition (*bhāva*). (100)

The means (to attain) that which is hard to achieve is (the *maṇḍala*) called Kadamba within the two emissions.[107] Power is within the instruments (of mantra). It is within the instruments (of mantra) that power resides. (101)

Once known power, the instrument (of mantra) and mantra, one should practice (as does the) the Silent Lord. The Silent One is in the centre of the (one) silent[108] (reality) and is called the letter AIṀ. (102)

पञ्चरत्नस्य[५२९] विज्ञेय[५३०] ऐंकार[५३१] पञ्चरत्नकम् ।
भूमिका[५३२] पञ्चरत्नस्य ओघज्ञानसुभास्वरा[५३३] ॥ १०३ ॥
ज्ञात्वा मुक्तिर्न[५३४] संदेहो[५३५] इत्याज्ञा रत्नपञ्चके[५३६] ।

इत्याद्यावतारे माहमन्थानभैरवयज्ञे[५३७] अन्वये सप्तकोटिप्रमाणे मेरुमार्गविनिर्गते लक्षपादाधिके आद्यापीठावतारिते[५३८] विद्यापीठमार्गे विमलषट्कनिर्णये कादिभेदे आज्ञापारमेश्वरे पञ्चरत्नभूमिकाधिकारवर्णने[५३९] क्रमोदयो नामानन्दः ॥ ६२ ॥

One should know that the letter AIṀ is the Jewel of the Five (Jewels) of (the one reality which is the) Five Jewels. The (inner) plane (*bhūmikā*) of the (experience of the) Five Jewels is the beautifully radiant knowledge of the currents (of mantras) (*oghajñana*). Once it is known, (one) certainly (attains) liberation. This is the Command within the Five Jewels. (103-104ab)

This is the (sixty-second) chapter which is the emergence of the transmission (*kramodaya*) with regards to the description concerning *the Planes (of Realisation) of the Five Jewels*. It belongs to the primordial descent into the great sacrifice of the Churning Bhairava in the tradition (*anvaya*) that consists of seventy million (verses) that has emerged on the Path of Meru and (extends) for more than a hundred thousand quarter (verses). It has been brought (down to earth) into the first sacred seat along the path of the Seat of Knowledge (*vidyāpīṭha*). It is the ultimate purport of the Pure Six Thousand (verses) (*vimalaṣaṭka*) in the division beginning with 'KĀ' of the Supreme Lord's command.